यज्ञोपवीत

॥ श्री काशीविश्वनाथपुरी महल्ला बड़ी पियरी लाला लक्ष्मिणप्रशाद वो रामशरण लाल के श्रीप्रभाछापाखाने में यज्ञोपवीत बहुत शुद्ध करके छापा गया जिस किसी को लेना होय सो छापाखाने से मंगा लेवें मि॰ माघ शुक्ल १२ सोम: सं॰ १९५२

CC-0:Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

य॰
वि॰
१

॥ ॐ श्रीगणेशाय नमः ॥ अथोपनयनं तत्र मुहूर्त्तसमये रविगुरुचंद्रतारादिशुद्धौ जन्मतो गर्भाष्टमे ऽष्टमे वानुकू-
ल्ये षोडशसंवत्सराभ्यंतरे ब्रह्मवर्च्चसकामस्य पंचमे प्युत्तरायणे आपूर्य्यमाणपक्षे नध्यायषष्ठीरिक्ताद्यतिरिक्ततिथौ
रविगुरुशुक्रान्यतमवारे मध्यान्हात्प्राक् कुमारपित्रा मधुपर्किके कृते तदभावे आचार्य्येणैव कृते ब्राह्मणान्माणव-
कं च भोजयित्वा सशिखं कृतक्षौरं स्नानानंतरं यथाशक्त्यालंकृतं कृत्वा बहिः शालायां तुषकेशशर्करादिशून्ये परि-
स्कृतभूमौ आचार्य्योऽग्निस्थापनं कुर्यात् तत्र हस्तमात्रपरिमितचतुरस्रभूमिं कुशकरणेन समूहनानंतरं गोमयोद-
केनोपलिप्य स्रुवमूलेन प्रागग्राः रेखाः प्रादेशमात्राः उत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य
तज्जलेनाभ्युक्ष्य नवीनकांस्यपात्रेणाग्निमानीय स्वाभिमुखं निदध्यात् ततः कुमारमाचार्य्यः शिष्यद्वारा अग्नेः पश्चा-
द्दक्षिणपार्श्वे उपस्थापयति ततः कुमारः कृतांजलिः संबोधयति ॐ ब्रह्मचर्यमागामिति ब्रूहि इति प्रैषानंतरं ॐ ब्रह्म-
चर्यमागामिति कुमार आह ततः ॐ ब्रह्मचार्यसानीति ब्रूहीत्याचार्येणोक्ते ॐ ब्रह्मचार्यसानीति कुमार आह अ-
थ माणवकमाचार्यो वासः परिधापयति तत्र आचार्यपठनीयो मंत्रः ॐ येनेन्द्राय बृहस्पतिर्वासः पर्य्यदधादमृतं
तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ततो माणवकस्य द्विराचमनम् अथ माणवकस्य वेष्टनत्रयं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णात्तत् प्रवरग्रंथियुतां मेखलामाचार्यो बध्नाति तत्र माणवकपठनीयो मंत्रः इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुन
तीम आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं ॐ युवा सुवासाः परिवीत आगात् स उ श्रेया
न्भवति जायमानः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति वा ततः आचार्यो यज्ञोपवीतसहितं षोडशाष्ट
तयं ब्राह्मणेभ्यो दत्वा ततस्तद्यामुकगोत्रः स्वकीयोपनयनकर्मविषयकसंतत्संस्कारसामर्थ्यार्थं षोडशाष्टतयं सयज्ञोपवी
तं सदक्षिणं यथानामेति ततो यज्ञोपवीतं परिदधाति माणवकः ॐ यज्ञोपवीतमिति मंत्रस्य परमेष्ठी ऋषिर्लिंगोक्ता
देवता त्रिष्टुप् छंदो यज्ञोपवीतपरिधाने विनियोगः ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं
प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण ततः ऐणेयमजिनं तूष्णीं परिधत्ते ततो माणवकः केशपरिमितपा
लाशदंडमाचार्यः तूष्णीं तस्मै प्रयच्छति तत्र चपोम दंड इति प्रजापतिऋषिर्दंडो देवता यजुर्दंडग्रहणे विनियोगः यो मे
दंडः परापतद्वैहायसोधिभूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय इति मंत्रेण माणवको गृह्णाति ततः आ
चार्यो वारिणा स्वमंजलिं पूरयित्वा कुमारस्यांजलिं तेनैवांजलिजलेन पूरयति ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे द
धातन महे रणाय चक्षसे ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरंगमाम वो यस्य क्ष

CC-0.Courtesy Shri K.S.Parihar Librarian,Government District Library Varanasi. Digitized by eGangotri

य. यायज्ञिन्वथ आपोजनयथाचनः इतिऋग्भिः ततः सूर्यमुदीक्षस्वेति आचार्यप्रैषानंतरं ॐतच्चक्षुर्देवहितं
प. पुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतंजीवेमशरदः शतंॐशृणुयामशरदः शतंप्रब्रवामशरदः शतमदीनाःस्या
२ मशरदः शतंभूयश्चशरदः शतात् इत्यनेनादित्यंपश्यति अथकुमारस्यदक्षिणांससमहृदयंदक्षिणहस्तेनस्पृशा
त्याचार्यः ॐममव्रतेतेहृदयंदधामि ममचित्तमनुचित्तंतेअस्तुममवाचमेकमनाजुषस्वबृहस्पतिस्त्वानियुनक्तुमह्यं
इतिमंत्रेण ततः कुमारस्यदक्षिणहस्तेगृहीत्वातंपृच्छति कोनामासि श्रीअमुकशर्माहंभोइतिकुमारआह कस्यब्रह्मचा
र्यसीत्याचार्यः भवत इतिकुमारआह पुनराचार्योभाषते ॐइंद्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्य श्रीअमु-
कशर्मन् अथमाणवकेबद्धांजलिपूर्वोदिदिक्षुमदक्षिणमुपस्थानंकारयति अथाचार्योमाणवकंभूतेभ्यःपरिददाति
तत्रआचार्यस्यमंत्रपाठः ॐप्रजापतयेत्वापरिददामीतिप्राच्यां ॐदेवायत्वासवित्रेपरिददामि इतिदक्षिणस्यां ॐअद्भ्य
स्त्वौषधीभ्यःपरिददामि इतिप्रतीच्यां ॐद्यावापृथिवीभ्यांत्वापरिददामि इतिउदीच्यां ॐविश्वेभ्यस्त्वादेवेभ्यःपरिददामि
इत्यधः ॐसर्वेभ्यस्त्वाभूतेभ्यःपरिददाम्यरिष्टेयइत्यूर्ध्वं ततोग्निप्रदक्षिणीकृत्यआचार्यदक्षिणदिशिउपविशतिमाणव
कः ततः पुष्पचंदनतांबूलवासांस्याचार्याय ततः ॐमद्यकर्तव्योपनयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुं २

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अमुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे इतिब्राह्मणंवृणुयात्‌ओंवृतो
स्मीतिप्रतिवचनंपुष्पचंदनताम्बूलवस्त्राण्यादायअद्यकृतैतोपनयनकर्मणिहोतृत्वकर्मकर्तुंअमुकगोत्रममुकश
र्माणंब्राह्मणमेभिःपुष्पचंदनतांबूलवासोभिःहोतृत्वेनत्वामहंवृणेइतिहोतारंवृणुयात्‌वृतोस्मीतिप्रतिवचनंओंयथा
विहितंकर्मकुर्वित्याचार्येणोक्ते ओंकरवाणीतिब्राह्मणोवदेत्‌ ततोग्नेर्दक्षिणतःशुद्धमासनंदत्वातदुपरिप्रागग्रान्कु
शानास्तीर्यब्रह्माणमग्निप्रदक्षिणंकारयित्वाअस्मिन्कर्मणित्वंमेब्रह्माभवेत्यभिधायभवानीतितेनोक्तेतदुपरिब्राह्मण
मुदङ्मुखमुपवेश्यततःप्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकु
शोपरिनिदध्यात्‌ ततःपरिस्तरणंबर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं ब्रह्मणोग्निपर्यंतंनैर्ऋत्याद्वायव्यांतंअ
ग्नितःप्रणीतापर्यंतंततोग्नेरुत्तरतःपश्चिमदिशिपवित्रछेदनार्थंकुशत्रयंपवित्रार्थंसाग्रमनंतर्गर्भंकुशपत्रद्वयंप्रोक्ष
णीपात्रंआज्यस्थालीसंमार्जनार्थंकुशाःउपयमनकुशाःसमिधस्तिस्रःस्रुवःआज्यंषट्पंचाशदुत्तरवरार्यमुष्टिशत
द्वयावच्छिन्नामतंडुलपूर्णपात्रंपवित्रछेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयंततःपवित्रछेदनकुशैःपवित्रेछि
त्वासपवित्रंकरेणप्रणीतोदकात्रिःप्रोक्षणीपात्रेनिधायअनामिकांगुष्ठाभ्यांगृहीतपवित्राभ्यांतज्जलंकिंचित्रिरुत्क्षिप्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प० प्रणीतोदकेनप्रोक्षणींत्रिरभिषिच्यप्रोक्षणीजलेनासादितवस्तुरेचनंकृत्वाऽग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात्
३ आज्यस्थाल्यामाज्यनिर्वापःअधिश्रयणंततःकुशंप्रज्वाल्याज्योपरिप्रदक्षिणंभ्रामयित्वावह्नौतत्प्रक्षिप्यस्रुवंत्रिःपरि
तप्यसंमार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतःस्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रतप्यदक्षिणतोनिदध्यात्
ततआज्यमग्नेरवतार्यत्रिःप्रोक्षणीवदुत्पूयावेक्ष्यसत्यपद्रव्येतन्निरसनंकृत्वापुनःप्रोक्षण्युत्पवनेनतदुत्थायोपय
मनकुशान्वामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वातूष्णींघृताक्तास्तिस्रःसमिधःप्रक्षिपेत्उपविश्यसपवित्रप्रोक्षण्युदके
नप्रदक्षिणक्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेनिधायपातितदक्षिणजानुःब्रह्मणान्वारब्धःसमिद्धतमेऽग्नौस्रुवेणाज्या
हुतीर्जुहोतितत्रतत्तदाहुत्यनन्तरंस्रुवावस्थितघृतशेषस्यप्रोक्षणीपात्रेप्रक्षेपःॐप्रजापतयेस्वाहाइदंप्रजापतये।
इतिमनसाॐइन्द्रायस्वाहाइदमिन्द्रायइत्याघारौॐअग्नयेस्वाहाइदमग्नयेॐसोमायस्वाहाइदंसोमायइत्याज्यभागौ
ॐभूःस्वाहाइदंभूःॐभुवःस्वाहाइदंभुवःॐस्वःस्वाहाइदंस्वःएतामहाव्याहृतयःॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडो
अवयासिसीष्ठाःयजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहाइदमग्नीवरुणाभ्यांॐसत्वन्नोअग्नेऽव
मोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वणोवरुणंरराणोवीहिमृडीकंॐसुहवोनएधिस्वाहाइदमग्नीवरुणाभ्यां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ओंअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्त्वमयाअसिअयानोयज्ञंवहास्ययानोधेहिभेषजंओंस्वाहाइदमग्नयेओंयेतेशतंवरुणयेसहस्रंयज्ञियापाशाविततामहांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्क्काःस्वाहाइदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्क्केभ्यःओंउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहाइदंवरुणायएताःसप्तःसर्वप्रायश्चित्तसंज्ञकाःओंप्रजापतयेस्वाहाइदंप्रजापतयेइतिमनसाप्राजापत्यम्ओंअग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृतेइतिस्विष्टकृद्धोमःततःसंस्रवप्राशनंआचमनंचततोब्रह्मणेदक्षिणादानंओंअद्यएतस्मिन्उपनयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतंअमुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददेइतिदक्षिणांदद्यात्ओंस्वस्तीतिप्रतिवचनंततोब्रह्मग्रंथिविमोकःततःओंसुमित्रियानआपओषधयःसंतुइतिपवित्राभ्यांजलमानीयतेनशिरःसंमृज्यओंदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मःइतिऐशान्यांप्रणीतान्युब्जीकरणंततःस्तरणक्रमेणबर्हिरुत्थाप्यघृतेनाभिधार्यहस्तेनैवजुहुयात्ओंदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञंओंस्वाहावातेधाःस्वाहाइतिबर्हिर्होमःततआचार्यःकुमारस्यानुशासनंकरोतिओंब्रह्मचार्यसीत्याचार्यःओंअसानीतिब्रह्मचारीओंअपोशानेत्याचार्यः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ब्र० ओंअश्मानीतिकुमारआहओंकर्मकुर्वित्याचार्यःओंकरवाणीतिमाणवकःओंमादिवासुषुप्थाइत्याचार्य्यःनस्वपानीति
५ कुमारःओंवाचंयच्छइत्याचार्य्यःओंयच्छानीतिकुमारःओंसमिधमाधेहीत्याचार्य्यःओंआदधानीतिमाणवकःओं
अपोऽश्नानेत्याचार्य्यःओंअश्नानीतिकुमारः अथाग्नेरुत्तरतःप्रत्यङ्मुखायोपविष्टायाचार्य्यचरणोपसंग्रहणपू
र्वकमुपसन्नायाचार्य्यसमीक्षमाणायाचार्य्यःस्वयमपिसमीक्षितायास्मैनिवारितशेरवत्तूष्णींदिशंवद्दुह्यांसकेसा
वित्रीमन्वाहतत्रप्रथमावृत्तौओंभूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्ॐपुनर्वारद्वयं
अत्रतुसहपाठोविशेषः अथमाणवकआचार्यदक्षिणदिशिअग्निपश्चिमोपविष्टोघृताक्तस्रुच्छनिषिद्धनेंधनेन
जुहुयात्ततःओंअग्नेसुश्रवःसुश्रवसंमाकुरुओंयथात्वमग्नेसुश्रवःसुश्रवाअसिओंएवंमाओंसुश्रवःसौश्रवसंकु
रुओंयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसिओंएवमहंमनुष्याणांवेदस्यनिधिपोभूयासम्ततःप्रदक्षिणमग्निं
वारिणापर्युक्ष्यउत्थायस्वप्रादेशमितांघृताक्तपलाशसमिधमादायओंअग्नयेसमिधमाहार्षंबृहतेजातवेद
सेयथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनसमिंधेजीवपुत्रोम
माचार्य्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्व्यन्नादोभूयासंॐस्वाहाइतिमंत्रेणजुहुयात्तए

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वंस्त्रमिदंतरद्द्वयंजुहुयात्ॐअग्नेसुश्रवसंमाकुरु ॐयथात्वमग्नेसुश्रवःसुश्रवाअसिॐएवंमांसुश्रवःसौश्रवसं
कुरुॐयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसिॐएवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् ततःप्रदक्षि-
णमग्निंपर्युक्ष्यतूष्णींपाणीप्रतप्यमुखंसंमार्ष्टिमंत्रोतेऽवमृशतिॐतनूपाअग्नेसितन्वंमेपाहिॐआयुर्दाअग्नेस्यायुर्मेदेहि
ॐवर्चोदाअग्नेसिवर्चोमेदेहिॐअग्नेयन्मेतन्वाऊनंतन्मआपृणॐमेधांमेदेवःसविताआदधातुॐमेधांमेदे
वीसरस्वतीआदधातुॐमेधांअश्विनौदेवावाधत्तांपुष्करस्रजौततःसर्वगात्रादिषुदक्षिणपाणिनास्पर्शःअत्रप्र
त्येकंमंत्रःॐअंगानिचमआप्यायन्ताम् इतिसर्वगात्रालंभनेॐवाक्चमआप्यायतामिति मुखालंभनेॐप्राणश्च
मआप्यायतामितिनासिकयोःॐचक्षुश्चमआप्यायतामितिचक्षुषोःॐश्रोत्रंचमआप्यायतामितिश्रोत्रेॐयशो
बलंचमआप्यायतामितिमंत्रपाठमात्रंततोदक्षिणकरानामिकाग्रगृहीतभस्मनाललाटग्रीवायांदक्षिणबाहुमू
लेहृदिचत्र्यायुषंकुर्यात् तत्रयथासंख्येनमंत्रचतुष्टयंॐत्र्यायुषंजमदग्नेःइतिललाटेॐकश्यपस्यत्र्यायुषम्
इतिग्रीवायाम्ॐयद्देवेषुत्र्यायुषम् इतिदक्षिणबाहुमूलेॐतन्नोअस्तुत्र्यायुषम् इतिहृदिततोव्यस्तपाणिभ्यांपृ
थिवीस्पर्शनमभिवादनंकुर्यात्तत्रप्रकारःॐअमुकगोत्रोहममुकप्रवरोहममुकशर्माहंभोवैश्वानरत्वामभिवादये

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ये ततोऽनेनैव क्रमेण सर्वो ध्यवरूपामभिवाद्याचार्यं तथैवाभिवादयेत् ततः आयुष्मान्भव सौम्येत्याचार्यो ब्रूयात्॥
ततो भिक्षापात्रमादाय प्रथमं मातुः सकाशात् ॐ भवति भिक्षां मे देहि इति प्रार्थनानंतरं तद्दत्तां चादायाचार्याय निवे
दयेत् तथैव भिक्षान्तरं याचेत् ततः आचार्येण सुस्वेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ततः फलपुष्पचंदनयुतपूर्णस्रु
वेण ब्रह्मचारिदक्षिणकरस्पृष्टेनाचार्यः पूर्णाहुतिं दद्यात् तत्र मंत्रः ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत
आजातमग्निं कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयंत देवाः स्वाहा इदमग्नये ततः स्रुवेण भस्मानी
य दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषं जमदग्नेः इति ललाटे ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायां ॐ यद्दे
वेषु त्र्यायुषम् इति दक्षिणबाहुमूले ॐ तन्नो अस्तु त्र्यायुषम् इति हृदि इति त्र्यायुषं कुर्यात् कुमारपक्षे तन्नो इत्य
स्य स्थाने तत्ते इति विशेषः अथ क्षारलवणमधुमांसादि निवृत्तिः उद्धृतजलस्नानदंडकृष्णाजिनधारणवृक्षा
रोहणविषमभूमिलंघननग्नस्त्रीनिरीक्षणस्त्रीसंभोगव्यसनत्यागनिरूपा ब्रह्मचारिणो नियमाः तद्दिने ब्रह्मचारी वा
ग्यतो हः शेषं स्थित एवं गमयेत् ततः सायंसंध्यां कृत्वा तस्मिन्नेवाग्नौ पूर्ववद्दर्भपुंक्षणपरिसमूहनं कृत्वा वाचं विसृजेत्
परिसमूहनं तु शुष्कनिषिद्धेतरेंधनस्याग्नौ प्रक्षेपः ततः संध्यामुपास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्त्तव्या अथ वे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हारंभः ततः कृतनित्यक्रिय आचार्य्यः कुशैर्हस्तमात्रपरिमितां भूमिं परिसमूह्य तान्कुशानैशान्यां परित्यज्य गोमयोदके
नोपलिप्य स्रुवमूलेन उत्तरोत्तरतः प्रागग्रं प्रादेशमात्रं त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्यु
क्ष्य कांस्येनाग्निमानीयाभिमुखमुपसमाधाय पुष्पचंदनताम्बूलवस्त्राण्यादाय ॐ अद्य कर्त्तव्ये वेदारंभहोमकर्म्मणि कृ
ताकृतावेक्षणरूपब्रह्मकर्म्म कर्त्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे॥
इति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं ॐ यथाविहितं कर्म्म कुर्विति आचार्य्यः ॐ करवाणीति तेनोक्ते अग्नेर्दक्षिण
तः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्निं प्रदक्षिणक्रमेण भ्रामयित्वा अस्मिन्कर्म्मणि त्वं मे
ब्रह्मा भवेत्यभिधाय ॐ भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कु
शैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेया
दीशानान्तम् ब्रह्मणोऽग्निपर्य्यन्तम् नैर्ऋत्याद्वायव्यान्तम् अग्नितः प्रणीतापर्य्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेद
नार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्ज्जनकुशाः उपयमनकुशाः
समिधस्तिस्रः स्रुवः आज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वं पूर्वदिशि क्रमेणासादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प० १२

त्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं।
ततः प्रोक्षणीपात्रं वामहस्ते गृहीत्वा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिरुद्दिंगनम् ततः प्रणीतोदकेन प्रोक्षणीपात्रप्र
भ्युक्ष्य प्रोक्षणीजलेन यथासादितवस्तून्यभिषिच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्थाल्यामा
ज्यं निरूप्याधिश्रयणम् ततः कुशं प्रज्वाल्याज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रामयित्वा चाग्नौ तत्प्रक्षेपः ततस्त्रिः स्रुवप्रतपनं
संमार्ज्जनकुशानामग्रैरन्तरतो मूलैर्वाह्यतः अवसंमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् ततः
आज्यमग्निप्रदक्षिणं भ्रामयित्वावतार्य्याग्रे निदध्यात् ततः आज्ये प्रोक्षणीवदुत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरसनं ततः
प्रोक्षण्युत्पवनं ततः उत्थायोपयमनकुशानादाय प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत् ततः
उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रं पवित्रे निधाय ब्रह्मणान्वारब्धः पातितदक्षि
णजानुः समिद्धतमेऽग्नौ जुहुयात् तत्र प्रथमाहुतिचतुष्टयेन स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं प्र
जापतये स्वाहा इदं प्रजापतये इति मनसा ओं इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ ओं अग्नये स्वाहा इदमग्नये ओं सोमा
य स्वाहा इदं सोमाय इत्याज्यभागौ ततः प्राकृतोऽनन्वारब्धकर्तृको होमः ओं अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय ओं वा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यवे स्वाहा इदं वायवे ओं ब्रह्मणे स्वाहा इदं ब्रह्मणे ओं छन्दोभ्यः स्वाहा इदं छन्दोभ्यः एतासामाज्याहुतयः ओं प्रजापतये स्वा
हा इदं प्रजापतये इति मनसा ओं देवेभ्यः स्वाहा इदं देवेभ्यः ओं ऋषिभ्यः स्वाहा इदं ऋषिभ्यः ओं श्रद्धायै स्वाहा इदं श्रद्धा
यै ओं मेधायै स्वाहा इदं मेधायै ओं सदसस्पतये स्वाहा इदं सदसस्पतये ओं अनुमतये स्वाहा इदं अनुमतये ततोऽन्वार
ब्धः कर्त्तृको होमः ततदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं भूः स्वाहा इदं भूः ओं भुवः॥
स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ओं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः
यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ओं सत्वन्नो अग्ने वमो भ
वोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नी
वरुणाभ्यां ओं अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमयाअसि अया नो यज्ञं वहास्या नो धेहि भेषजं स्वाहा
इदमग्नये ओं ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरु
तः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुणपाशमस्मदवाध
मं विमध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय इति सर्वप्रायश्चि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पु० ७ त्तसंज्ञकाः ॐ प्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा इतिप्राजापत्यं ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्ट
कृते इतिस्विष्टकृद्धोमः ततः संस्रवप्राशनं ततआचम्य ॐ अद्यकृतेतद्दारंभहोमकर्मणिकृताकृतावेक्षणरूप
ब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसं
प्रददे इतिदक्षिणांदद्यात् ॐ स्वस्तीतिप्रतिवचनं ततोब्रह्मग्रंथिविमोकः ॐ सुमित्रियानआपओषधयः संतु इतिप
वित्राभ्यांप्रणीताजलमानीयतेनशिरः संमृज्य ॐ दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इतिमंत्रेणऐशान्यांप्र
णीतान्युब्जीकरणं ततस्तरणबर्हिरानीयघृतेनाभिघार्यहस्तेनक्रमेणनैवजुहुयात् ॐ देवागातुविदोगातुंवित्त्वागातु
मितमनसस्पतइमंदेवयज्ञंस्वाहावातेधाःस्वाहा इतिबर्हिर्होमः ततःकाश्मीरगमनंततइष्टांसर्वेवेदारंभंगुरुः
कारयेत् तत्रक्रमः ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॐ इतिप्रणवांतंपठि
त्वापंक्तिनमस्कारंचकारयित्वा ॐ समिधाग्निंदुवस्यतघृतैर्बोधयतातिथिं आस्मिन्हव्याजुहोतनसुसमिद्धायशो
चिषं इतिकंडिकांतरंवाफक्किकांवापाठयेत् ततःसप्रणवंस्वस्तिवाचयित्वाउत्थायफलपुष्पसमन्वितंब्रह्मचारिद
क्षिणकरस्थेनघृतपूर्णेनपूर्णाहुतिंदद्यात् ॐ मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकविंसम्राज

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मतिर्थिं जनानामासान्नापात्रं जनयंत देवाः इति पूर्णाहुतिं दत्त्वा उपविश्य स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृही
तभस्मना त्र्यायुषं जमदग्नेरिति ललाटे ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले
ॐ तन्नो अस्तु त्र्यायुषमिति हृदि अनेनैव क्रमेण ब्रह्मचारिललाटादावपि तत्र नतेइति विशेषः इति वेदारंभः अथ स
मावर्तनं तत्र शुभे दिने प्रह्वीभूय आचार्यं स्नास्यामीति कुमार आचार्यं भाषते तत्र स्नाहीत्याचार्यः ततो ब्रह्मचा
रिणि आचार्यसन्निहितदक्षिणदिशि उपविष्टे कृतस्नानादिराचार्यः कुशैर्हस्तमात्रां भूमिं परिसमूह्य तानैशान्यां प
रित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणाङ्गुष्ठजलेनाभ्युक्ष्य कांस्येना
ग्निमानीय प्रत्यङ्मुखं निदध्यात् ततः पुष्पचंदनतांबूलवासांस्यादाय ॐ अद्यामुकस्य कर्तव्यसमावर्तनहोमकर्म
णि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन
त्वामहं वृणे वृतोस्मीति प्रतिवचनं यथाविहितं कर्म कुर्विति अभिधाय ॐ करवाणीति तेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनं द
त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अस्मिन् कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ॐ भवानीति तेनोक्ते ब्राह्मणमुदङ्मुखं तत्रो
पवेश्य ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

य० न् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोग्निपर्यन्तं नैर्ऋत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं
८ ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रम् आ
ज्यस्थाली संमार्जनार्थं कुशाः उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वं पूर्वदिशि
क्रमेणासादनीयम् ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायाना
मिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामकरेणादायानामिकांगुष्ठगृहीतपवित्राभ्यां तज्जलं किं
चित्त्रिः प्रक्षिप्य प्रणीतोदकेन प्रोक्षणीमभ्युक्ष्य प्रोक्षणीजलेन यथासादितवस्तून्यभिषिच्याग्निप्रणीतयोर्मध्ये
प्रोक्षणीपात्रं निदध्यात् तत आज्यस्थाल्यामाज्यनिर्वापः अधिश्रयणं ततस्तृणं प्रज्वाल्याज्यस्याग्रेश्चोपरि प्रदक्षि
णं भ्रामयित्वा वन्हौ तत्प्रक्षिपेत् स्रुवं त्रिः प्रतप्य संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेना
भ्युक्ष्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् तत आज्यमग्नेः प्रदक्षिणं भ्रामयित्वावतार्य त्रिः प्रोक्षणीवदुत्पूयावेक्ष्य
सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः पूर्ववत्प्रोक्षण्युत्पवनं ततः उत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा
ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत् तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निप

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय प्रान्तिन दक्षिणजानुः समिद्धतमेऽग्नौ ब्रह्मणान्वारब्धः स्रुवेणाज्याहुतीर्जुहुयात् तत्र
प्रथमाहुतिचतुष्टये प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजापतये स्वाहा इदं प्रजाप
तये इति मनसा ॐ इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इत्या
ज्यभागौ ततोन्वारब्धकर्तृकहोमः ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय ॐ वायवे स्वाहा इदं वायवे ॐ ब्रह्मणे स्वाहा इ
दं ब्रह्मणे ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ देवेभ्यः स्वाहा इदं देवेभ्यः ॐ ऋ
षिभ्यः स्वाहा इदं ऋषिभ्यः ॐ श्रद्धायै स्वाहा इदं श्रद्धायै ॐ मेधायै स्वाहा इदं मेधायै ॐ सदसस्पतये स्वाहा इदं सदस
स्पतये ॐ अनुमतये स्वाहा इदमनुमतये ततो ब्रह्मणाऽन्वारब्धो जुहुयात् अत्राहुतिदशतयेनन्तराहुत्यनन्तरं स्रुवाव
स्थिताज्यस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ भूः स्वाहा इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः एता महाव्याहृतयः
ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस
त्स्वाहा इदमग्नीवरुणाभ्यां ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृ
डीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्त्वमया असि अया नो यज्ञं वा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हास्यायानोधेहिभेषजꣳस्वाहाइदमग्नयेओंयेतेशतंवरुणयेसहस्रंयज्ञियापाशावितताभहांतःतेभिर्नोअद्यसवितो
तविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहाइदंवरुणायवित्रेविष्णुवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यःओंउदुत्तमंवरुण
पाशमस्मदवाधमंविमध्यमꣳश्रथायअथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणायइतिस
र्वप्रायश्चित्तंओंप्रजापतयेस्वाहाइदंप्रजापतये इतिमनसा इतिप्राजापत्यम्ओंअग्नयेस्विष्टकृतेस्वाहा इदमग्नये
स्विष्टकृते इतिस्विष्टकृत्ततःसंस्रवप्राशनम्ततआचम्यओंअद्यकृतैतत्समावर्तनहोमकर्म्मणिकृताकृतावेक्ष
णरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहं
संप्रददे इतिदक्षिणांदद्यात् ओंस्वस्तीतिप्रतिवचनं ततोब्रह्मग्रंथिविमोकःततःपवित्राभ्यांप्रणीताजलेनओंसुमि
त्रियानआपओषधयसंतु इतिमंत्रेणशिरःसंमृज्यओंदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इतिमंत्रेणैशा
न्यांप्रणीतान्युब्जीकरणंततस्तरणक्रमेणवर्हिरानीयघृतेनाभिघार्यहस्तेनैवजुहुयात्ओंदेवागातुविदोगातुकिं
वागातुमितमनसानेइमंदेवयज्ञꣳस्वाहावातेधाःस्वाहाइतिवर्हिर्होमःततोब्रह्मणान्वारब्धकर्तैककर्म्मततोग्नि
पश्चिमोपविष्टोब्रह्मचारिपरिसमूहनंकुर्य्यात् तत्रहस्तनात्तस्रुचकनिषिद्धेतरेंधनेनपंचाहुतीर्हस्तेनैवजुहुयात्ओंअ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ग्नेसुश्रावःसुश्रवसंमाकुरुओंयथात्वमग्नेसुश्रवःसुश्रवाअसिओंएवंमांसुश्रवःसौश्रवसंकुरुओंयथात्वमग्नेदेवानांयज्ञ
स्यनिधिपाअसिएवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् ततःप्रदक्षिणमग्निंवारिणापर्युक्ष्यउत्थायघृताक्तांप्रा
देशमितांसमिधमादायजुहुयात् तत्रमंत्रः ओंअग्नयेसमिधमाहार्षंबृहतेजातवेदसेयथात्वमग्नेसमिधासमिध्यस
एवमहमायुषामेधमादायजुहुयात् तत्रमंत्रः ओंअग्नयेसमिधमाहार्षंबृहतेजातवेदसेयथात्वमग्नेसमिधासमि
वर्चसाप्रजयापशुभिर्ब्रह्मवर्चसेन समिंधेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्म
वर्चस्व्यन्नादोभूयासंस्वाहाततःसमिदंतरद्वयमनेनेवक्रमेणप्रत्येकंहुत्वाउपविश्यतेनेवक्रमेणपंचाहुतीर्घृताक्ताश्व
रूनिषिद्धेतरेंधनेनजुहुयात् ओंअग्नेसुश्रवःसुश्रवसंमाकुरुओंयथात्वमग्नेसुश्रवःसुश्रवाअसिओंएवंमांसुश्रवः
सौश्रवसंकुरुओंयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसिओंएवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् ततःप्रदक्षिण
मग्निंवारिणापर्युक्ष्यतूष्णींपाणीप्रतप्यमुखंप्रतिमंत्रांतेविमृशति ओंतनूपाअग्नेसितन्वंमेपाहिओंआयुर्दाअग्नेस्या
युर्मेदेहिओंवर्चोदाअग्नेसिवर्चोमेदेहिओंअग्नेयन्मेतन्वाऊनंतन्मआपृणओंमेधांमेदेवःसविताआदधातुओंमेधांमे
देवीसरस्वतीआदधातु ओंमेधांमेअश्विनौदेवावाधत्तांपुष्करस्रजौ तत्रसर्वगात्रादिषुदक्षिणमोपाणिनास्पर्शः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

य० तत्रप्रत्येकमंत्रः ॐअंगानिचमआप्यायंताम् इतिसर्वांगालंभनेवाक्चमआप्यायतामितिमुखालंभनेॐप्राण
१० श्चमआप्यायतामितिनासिकयोः ॐचक्षुश्चमआप्यायतामितिचक्षुर्द्वयस्पर्शः ॐश्रोत्रंचमआप्यायतामितिश्रोत्रद्व
यस्पर्शः ॐयशोबलंचमआप्यायतामितिमंत्रपाठमात्रं ततोदक्षिणानामिकाग्रगृहीतभस्मनाललाटग्रीवायांद
क्षिणबाहुमूलेहृदिचत्र्यायुषंकुर्यात् यथासंख्येनमंत्रचतुष्टयम् ॐत्र्यायुषंजमदग्नेरितिललाटे ॐकश्यपस्यत्र्या
युषं इतिग्रीवायां ॐयद्देवेषुत्र्यायुषं इतिदक्षिणबाहुमूले ॐतन्नोअस्तुत्र्यायुषंइतिहृदि ततोव्यस्तपाणिभ्यांपृथि
वींस्पृशन् प्रथमंवैश्वानरंसंवोध्याभिवादयेत् तत्रामुकगोत्रोहममुकप्रवरोहममुकशर्माहंभोवैश्वानरत्वामभिवा
दये इतिप्रकारः ततस्तथैववरुणांसंवोध्याभिवादयेत् तथैवाचार्यंचाभिवादयेत् ततःआयुष्मान्भवसोम्यइत्याचा
र्योब्रूयात् ततोग्नेरुत्तरतःप्रागग्रान्कुशानास्तीर्य तदुपरिदक्षिणोत्तरक्रमेणासादितवारिपूर्णकलशद्वितयेकलश
नामुत्तरतःप्रागग्रेषुकुशेषुस्थित्वाएकस्मादाम्रपल्लवेनोदकंगृहीत्वाॐयेप्स्वन्तरग्नयःप्रविष्टागोह्यउपगोह्योमयूषोमने
हास्खलोविरुजस्तनूदूषुरिंद्रियहानान्निजहामियोरोचनस्तमिहगृह्णामि इतिमंत्रेण ततस्तेनमामभिषिंचामिश्रि
येयशसेब्रह्मणेब्रह्मवर्चसाय इत्यात्मानमभिषिंचति ततोद्वितीयघटस्थमुदकंगृहीत्वाम्रपल्लवेनाभिषिंचति ॐयेन

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रियमकृणुतांयेनावमृशतांसुरांयेनाक्षावभ्यषिंचतांयद्वांतदश्विनायशः इति मंत्रेण ततस्तेनैवक्रमेण तृतीयकलश
स्यजलमादायॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातनमहेरणायचक्षसे इति मंत्रेणाभिषिंच्यतेनैवक्रमेण चतुर्थ
कलशस्यजलमादायॐयोवःशिवतमोरसस्तस्यभाजयतेहनःउशतीरिवमातरः इति मंत्रेणाभिषिंच्यपंचमकलशस्थ
जलंतथैवादाय ॐतस्माअरंगमामवोयस्यक्षयायजिन्वथआपोजनयथाचनः इति मंत्रेणाभिषिंच्य ततोवशिष्टक
लशत्रयजलंतथैवप्रत्येकंगृहीत्वातूष्णींप्रत्येकमभिषिंचति ततोमेखलामोचनंशिरोभागेनॐउदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्याम इति मंत्रेण दंडकृष्णाजिनेतूष्णींभू
मौनिधायवस्त्रंनाहूत्वापरिधायोत्तरीयंचकृत्वाचम्यबद्धांजलिरादित्यमुपतिष्ठेत् ब्रह्मचारी ॐउद्यन्भ्राजभृष्णुरिंद्रोम
रुद्भिरस्थात्प्रातर्यावभिरस्थात्दशसनिरसिदशसनिंमाकुर्वाविदन्मागमय उद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिरस्थात्
सायंयावभिरस्थात् सहस्रसनिरसिसहस्रसनिंमाकुर्वाविदन्मागमय इति मंत्रेण ततोदधितिलान्प्राश्याचम्यनख
रोमाणिदीक्षच्छेदयित्वास्नात्वाचम्य प्रादेशमितउदुंबरकाष्ठेनदंतधावनं ॐअन्नाद्यायव्यूहध्वं सोमोराजायमागमत् समे
मुखंप्रमार्क्ष्यतेयशसाचभगेनच इति मंत्रेण ततोदंतकाष्ठंपरित्यज्याचम्यसुगंधिद्रव्येनोद्वर्तनानंतरंस्नात्वाहिराचम्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्ना. चंदनं कुंकुमादिना नासिकायां मुखस्यालंभने ॐ प्राणापानौ मे तर्प्पय ॐ चक्षुर्मे तर्प्पय ॐ श्रोत्रं मे तर्प्पय इति मंत्रेणांगुलि

११ पनं ततः पाणी प्रक्षाल्य दक्षिणाभिमुखः पातितवामजानुः कृतापसव्यो हिरण्मयगर्भकुशत्रयतिलजलान्यादाय आस्त

न्नकुशत्रयोपरि पितृंस्तर्प्पयेत् ॐ पितरः शुंधध्वमिति मंत्रेण ततः सव्यं कृत्वा आचम्यांगुलिप्यं जपेत् ॐ सुचक्षा अहमक्षी

भ्यां भूयासं सुवर्च्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् इति ततोऽहतवस्त्रपरिधाने ॐ परिधास्यै यशो धास्यै दीर्घायुत्वाय जरद

ष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये इति मंत्रेण ततो यज्ञोपवीतपरिधाने ॐ यज्ञोपवीतं परमं

पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण द्वितीयाग्रहणं य

ज्ञोपवीतमिति प्रजापतिऋषिर्यजूरूपवीन देवता यज्ञोपवीतपरिधाने विनियोगः यज्ञोपवीतमसि यज्ञस्य त्वोपवी

तेनोपनह्यामि आचमनं अथोत्तरीयं ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च मा विदद्यशो माप्र

तिपद्यतां इति मंत्रेण ततः पुष्पमालाग्रहणे मंत्रः ॐ या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय ता अहं प्र

तिगृह्णामि यशसा च भगेन च इति मंत्रेण पुष्पमालाग्रहणं ततः पुष्पमालापरिधाने ॐ यद्यशोऽप्सरसामिन्द्रश्चकार वि

पुलं पृथु तेन संग्रथिताः सुमनस आबध्नामि यशो मयि इति मंत्रेण पुष्पमालापरिधानं अथ वसुमतिष्ठा अथोष्णीषेण

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शिरोवेष्टनं ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मन
सा देवयन्त इति मंत्रेण ततः कुंडले परिदधाति ॐ अलंकरणमसि भूयोऽलंकरणं भूयात् ततोऽञ्जनं ॐ वृत्रस्यासि
कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि तत आदर्शे आत्मदर्शनं ॐ रोचिष्णुरसि इति मंत्रेण ततश्छत्रग्रहणं ॐ
वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि तत आदर्शे आत्मदर्शनं ॐ रोचिष्णुरसि इति मंत्रेण ततश्छत्र
ग्रहणं तेजसो यशसो मामन्तर्धेहि इति मंत्रेण ततः पद्भ्यामुपानहोः प्रतिग्रहणं ॐ प्रतिष्ठे स्थो विश्वतो मा पातं इति मंत्रे
ततो वैणवदंडधारणं ॐ विश्वाभ्यो मा नाष्ट्राभ्यः परि पाहि सर्वतः इति मंत्रे ततः स्नानकस्य नियमाः गानवादित्रनृत्यसं
गः न तत्र गमनं क्षेमे सति नितरां ग्रामान्तरगमनं न धावेत् न कूपेऽवेक्षणं न वृक्षारोहणं फलत्रोटनं अमार्गेण गमनं
नग्नो न स्नायात् न संधिसर्पणं न विषमभूमिलंघनं अश्लीलं नोपवदेत् उदितास्तसमये सूर्यं नोपपश्येत् जलमध्ये
देवे वर्षति न गच्छेत् उदके आत्मानं न पश्येत् अजातलोम्नीं प्रमत्तां पुरुषाकृतिं षंडं च न गच्छेदित्यादि तत आचा
र्याय वरं दक्षिणां दद्यात् ततः मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविं सम्राजमतिथिं ज
नयन्त देवाः स्वाहा इति मंत्रेण फलपुष्पसमन्वितघृतपूर्णस्रुवेण माणवकदक्षिणकरस्पृष्टेन उत्थाय पूर्णाहुतिम्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चार्य्यः कुर्य्यादिति श्रीवार्यां इति विशेषः ततो मूर्द्धास्वतादिग्रहणं इति श्री महामन्त्रक महासामंताधि
पतिश्री [illegible]गदत्तविरचिता वाजसनेयिनां उपनयन कर्मपद्धतिः समाप्ताः अथ सामग्री रोली१ मौ
ली१ केसर२ अवनासा७ आटा चावल पुष्प१२ पुष्पमाला धूप३ दीप१ तांबूल७ यज्ञोपवीत९ प्रणीता
पात्र३ प्रोक्षणी पात्र२ कांस्यपात्र६ छायापात्र१ सुवर्ण१ कुशा१ स्रुवा१ गोमय एरंगोगोहे पला
शसमिधा सेर३ पूर्णपात्र३ अर्पणे५ धोतीया५ कुपीन५ मृगचर्म१ पलाशदंड१ गूलरशाखा१
मेखला मूंजकी१ सुहारिया सेर१ पुरवा८ लोटिया८ नारियल२ खड़ाऊं जोड़ा१ पटीया१
चंगेर१ लाठी५ गुथली१ कसारू२॥ घृत।/ तिल३ दधि१ सुपारी११ आम्रपल्लव कलशादे पत्र१
अंजन१ दर्पण१ वस्त्र५ मोंतीड पान हों बटाने तदूर्वा दोने१० अथ वीरस्थेन हं ब्राह्मणभोजन२५
दक्षिणा पंचरंग२५ इति सामग्री॥ बनारस रेवाकुंडे चन्द्रशेखर यंत्रालये प्रयागसाहु ने मुद्रितः सं१९५८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri